महेशानि। जायते सिद्धिरुत्तमा। दिव्ये वीरे न भेदोऽस्ति ताभ्यां भेदः प्रशोक्ततः। दिव्यवीरौ प्रवक्ष्यामि सर्वभावोत्तमोत्तमौ। विना शक्तिं न पूजास्ति मत्स्यं मांसं विना प्रिये!। मुद्राञ्च मैथुनञ्चापि विना नैव प्रपूजयेत्। स्त्रीभगं पूजनाधारं स्वर्णरूप्यकमेव च। अभावे सर्वद्रव्याणामनुकल्पः कलौ युगे। अथ वा परमेशानि। मानसं सर्व्वमाचरेत्। स्नानन्तु मानसं प्रोक्तं वैदिके मानसं सदा। यत्र भुक्त्वा महापूजा मानसं भोजनन्तु तत्। स्वकीयां परकीयां वा मानसन्तु रमेत् स्त्रियम्। मानसं मद्यमीनादि स्वीकुर्य्यात् साधकोत्तमः। स्वैरन्तु कुसुमं तद्वत् मानसं समुपाचरेत्। मानसं भगरोमादि मानसं भगपूजनम्। सर्व्वन्तु मानसं कुर्य्यात् तेन सिद्धिमुपालभेत्” इति पिच्छिलातन्त्रे पूर्व्वखण्डे दशमःपटलः। तद्विवरणं तत्तच्छब्दे दृश्यम्। आचारचन्द्रिका आचारचिन्तामणिः आचारदीपः आचारमाधवः आचारमयूखः आचारादर्शः आचारार्कः इत्यादायश्च ग्रन्थाः आचारवेदनार्थाः भारतवर्षे देशभेदे च प्रसिद्धाः। तत एवाचारभेदा अवसेयाः। निषिद्धाचारस्य अनाचारः सच अनाचारशब्दे २५७ पृष्ठे उक्तप्रायः। अधिकं निषिद्धशब्दे वक्ष्यते।

**आचारदीप** पु० आचारार्थः नीराजनार्थोदीपः। राज्ञां वाजिप्रभृतीनां वा नीराजनार्थे दीपे।

**आचारवत्** त्रि० आचारः शास्त्रोक्तानुष्ठानं कर्त्तव्यतयाऽस्त्यस्य मतुप् मस्य वः। शास्त्रोक्तानुष्ठानयुक्ते स्त्रियां ङीप्।

**आचारवर्जित** त्रि०आचारेण वर्जितः। शास्त्रोक्ताचारहीने आचारहीनादयोऽप्यत्र।

**आचारवेत्तृ** त्रि० आचारं वेत्ति विद—तृच् स्त्रियां ङीप्। आचाराभिज्ञे। [ स्त्रियां ङीप्।

**आचारवेदिन्** त्रि० आचारं विद—णिनि। आचाभिज्ञे

**आचारवेदी** स्त्री आचारस्य वेदीव। पुण्यभूमौ हेम०।

**आचाराङ्ग** न० आचारमङ्गमिव। दृष्टिवादे द्वादशसु अङ्गेषु मध्ये अङ्गभेदे हेमचन्द्रः।

**आचारिन्** त्रि आचरति शास्त्रोक्तानुसारेण आ+चर—णिनि। शास्त्रोक्तानुष्ठानवर्ति स्त्रियां ङीप्।

**आचारी** स्त्री० सम्यक् चारः प्रसरणं यस्याः गौ० ङीष्। (हेलञ्चा) हिलमोचिकालतायाम्।

**आचार्य्य** पु० आ+चर—ण्यत्। “उपनीय तु यः शिष्यं वेदमध्यापयेत् द्विजः। सकल्पं सरहस्यं च तमाचार्य्यं प्रचक्षते” इति मनूक्तलक्षणे १ वेदाध्यापयितरि, “आम्नायतत्त्वविज्ञानाच्चराचरसमानतः। यमादियोगसिद्धत्वादाचार्य्य इति कथ्यते” इत्युक्तलक्षणे २ मतप्रस्थापके शङ्कराचार्य्यादौ च। स्त्रियां टाप् आचार्य्या। आचार्य्यपत्न्यान्तु ङीष् आनुक् च आचार्य्यानी न णत्वम्। “अग्निहोत्री तपस्वी च वेदमध्यापयेच्च यः। सकल्पं सरहस्यं च तमाचार्य्यं प्रचक्षते” दक्षः “कस्मादाचार्य्य आचारं ग्राहयत्याचिनोत्यर्थान् आचिनोति बुद्धिमिति वा” निरु० “आचार्य्यस्तु ते गतिं वक्तेति” छा० उप० “आचार्य्यात् पादमादत्ते पादं शिष्यः स्वमेधया। कालेन पादमादत्ते पादं सब्रह्मचारिभिः” नीलकण्ठधृता स्मृतिः। क्रमेणाचार्य्यसच्छिष्यधर्म्मभ्राते कतीर्थिनः” याज्ञ०। यज्ञादौ कर्म्मोपदेशके ३ गुरौ “आचार्य्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः तथा त्वं मम यज्ञेऽस्मिन्नाचार्य्यो भव सुव्रत! यथा शक्रस्य वागीश आचार्य्यः सर्व्वकर्म्मसु। तथा मया त्वमाचार्य्यः वृतोऽस्मिन् यज्ञकर्म्मणि” इति विधानपारि० पुरा०। ४पूज्यमात्रे त्रि० सुराचार्य्यः दैत्याचार्य्यः ५ शिक्षकमात्रे च “लङ्कास्त्रीणां पुनश्चक्रे विलापाचार्य्यकं शरैः” रघुः।

**आचार्य्यक** न० आचार्य्यस्य कर्म भावो वा योपधगुरूपोत्तमत्वात् वुञ्। आचार्य्यकर्मणि। “लङ्कास्त्रीणां पुनश्चक्रे विलापाचार्य्यकं शरैः” रघुः “नैष जातु महेष्वासः पार्थमक्लिष्टकारिणम्। हन्यादाचार्य्यकं दीप्तं संस्मृत्य शरनिर्मितम्” भा०उ०प०१६६ अध्या०। “आचार्य्यकं विजयि मान्मथमाविरासीत्” त्व आचार्य्यत्वं तत्रैव न० तल् आचार्य्यता तत्रैव स्त्री। सोऽचिरेणैव कालेन परमाचार्य्यतां गतः”।

**आचार्य्यभोगीन** त्रि० आचार्य्यभोगाय हितम् ख “आचार्य्यादणत्वम्” वार्त्तिकोक्तेः न णत्वम्। आचार्य्यभोगपर्य्याप्ते द्रव्यादौ।

**आचार्य्यमिश्र** पु० आचार्य्योमिश्रः। अतिशयपूज्ये।

**आचिख्यासा** स्त्री आख्यातुमिच्छा आ+ख्या-सन-अ। आख्यातुमिच्छायाम्। [आख्यातुमिच्छौ।

**आचिख्यासु** त्रि० आख्यातुमिच्छु आ+ख्या-सन उ।

**आचित** त्रि० आ+चि+क्त। १व्याप्ते, “कचाचितौ विष्वगिवागजौ गजौ” किरा० “फलैरुपचितैर्दिव्यैराचितां स्वादुभिर्भृशम्” (वदरीं ददृशुः) भा०व०प० १४५ अ०। २गुम्फिते ग्रथिते “अर्द्धाचिता सत्वरमुत्थितायाः” कुमारः रघुश्च “तुला पलशतं तासां विंशत्या भार आचितः” इत्युक्ते